## ण

ण, णकारः। स व्यञ्जनपञ्चदशवर्णः। टवर्गपञ्चमवर्णश्च॥ (अर्द्धमात्राकालेनोच्चारणीयः।) अस्योच्चारणस्थानं मूर्द्धा। इति व्याकरणम्॥ (शिक्षाग्रन्थादिमते तु अस्योच्चारणे जिह्वामध्येन मूर्द्धः स्पर्शः नासिकायत्नप्रभेदश्च आभ्यन्तरप्रयत्नः। संवारनादघोषाः अल्पप्राणश्च वाह्यप्रयत्नाः। मातृकान्यासेऽस्य दक्षपादाङ्गुल्यग्रे न्यासक्रिया॥ वङ्गीयवर्णमालायाम्।) तस्य लेखनप्रकारो यथा,—

"कुण्डलीत्रयगता रेखा मध्यतस्तत ऊर्द्धतः।
वामादधोगता सैव पुनरूर्द्धं गता प्रिये!॥
ब्रह्मेशविष्णुरूपा सा चतुर्व्वर्गफलप्रदा॥
ध्यानमस्य णकारस्य प्रवक्ष्यामि च तत् शृणु।
त्रिभुजां वरदां रम्यां भक्ताभीष्टप्रदायिनीम्॥
राजीवलोचनां नित्यां धर्म्मकामार्थमोक्षदाम्।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"
इति वर्णोद्धारतन्त्रम्॥ * ॥

अस्य स्वरूपं यथा,—

"णकारं परमेशानि! या स्वयं परकुण्डली।
पीतविद्युल्लताकारं पञ्चदेवमयं सदा॥
पञ्चप्राणमयं देवि! सदा त्रिगुणसंयुतम्।
आत्मादितत्त्वसंयुक्तं महामोक्षप्रदायकम्॥"
इति कामधेनुतन्त्रम्॥

तस्य २४ चतुर्विंशतिनामानि यथा,—

"णो निर्गुणं रतिर्ज्ञानं जम्भनः पक्षिवाहनः।
जया शम्भुर्नरकजित् निष्कला योगिनीप्रियः॥
द्विमुखं कोटवी श्रोत्रं समृद्धिर्बोधनी मता।
त्रिनेत्रो मानुषी व्योमदक्षपादाङ्गुलेर्मुखः॥
माधवः शङ्खिनी वीरो नारायणश्च निर्णयः॥"
इति नानातन्त्रशास्त्रम्॥

णः, पुं, (णखति गच्छति जानात्यनेन इति। णख गतौ+डः। पृषोदरादित्वात् णत्वम्।) ज्ञानम्। निश्चयः। इत्येकाक्षरकोषः। विन्दुदेवः। स बुद्धदेवताविशेषः। भूषणम्। गुणवर्ज्जितः। पानीयनिलयः। इति मेदिनी। णे, १॥

णक्ष, व्रजे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) नक्षति। व्रजो गतिः। इति दुर्गादासः॥

णख, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) प्रणखति। इति दुर्गादासः॥

णट, नृत्यहिंसयोः। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सकं च-सेट्।) प्रणटति। वोपदेवविधौ वर्ज्जनेऽपि अस्य परस्य चेह पाठः केषाञ्चिदनुरोधात्। अत्र नृत्यं साभिनयनर्त्तनम्। इति दुर्गादासः॥

णट, म नृतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) म, प्रणटयति। नृताविति नृत्यतेरौणादिककिप्रत्यये रूपम्। अत्र मिकारानुबन्धेनैवेष्टसिद्धे पूर्व्वे नृत्यग्रहणसामर्थ्यमेदार्थम्। तेन पूर्व्वे नृत्यं साभिनयनर्त्तनम् इह तु नृतिरभिनयरहितनर्त्तनमिति। यथा पूर्व्वस्य। स्फटिककटकभूतिर्नाटयत्येव शैलः। इति माघः। अस्य तु। नाटयेन केन नटयिष्यति दीर्घमायुरिति मुरारिः। इति दुर्गादासः॥

णद, अव्यक्तोक्तौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) अव्यक्तोक्तिरव्यक्तशब्दः। नदति घण्टा। इति दुर्गादासः॥

णद, क भाषि। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, नादयति। इति दुर्गादासः॥

णभ, ल ङ हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ल, अनभत्। ङ, नभते। इति दुर्गादासः॥

णभ, य श हिंसे। इति कविकल्पद्रुमः॥ (दिवां-क्र्यां-च-परं-सकं-सेट्।) य, नभ्यति। श नभ्नाति। इति दुर्गादासः॥

णम, औ शब्दे। नतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-नतौ सकं-अकं च अनिट्।) औ, नन्ता। शब्दार्थो न भाषायाम्। नतिरिह नमस्कारो नम्रीभावश्च। नमति गुरुं लोकः। नमन्ति फलिनो वृक्षाः। अमन्तेऽप्यस्य ज्वलज्वलह्मलेत्यादिना केवलस्य ह्रस्वविकल्पनात् सोपसर्गस्यैव नित्यं ह्रस्वः। नमयति नामयति प्रणमयति। श्वपुच्छमवनामितं वधिरकर्णजापः कृतः। इत्यादौ अवनमनं अवनामः घञ् ततो अवनामं करोतीति ञौ रूपम्। इति दुर्गादासः॥

णय, ङ गतौ। रक्षे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ङ, नयते। इति दुर्गादासः॥

णर्द, शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) वोपदेवविधावस्य वर्ज्जनेऽपि इह पाठः केषाञ्चिदनुरोधात्। प्रणर्दति। इति दुर्गादासः॥

णल, ज बन्धे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं सेट्।) ज, नालः नलः। नलति केशं लोकः बध्नाति इत्यर्थः। गन्धे इति केचित्। गन्धोऽदर्शनमिति गोविन्दभट्टः। इति दुर्गादासः॥

णश, ल य ऊ नाशे। इति कविकल्पद्रुमः॥ (दिवां-परं-अक वेट्-ल्वरङ वान्।) नाशो दर्शनाभावः। इति प्राञ्चः। लुक्कायनमिति सर्व्वस्वः। ल, अनेशत् अनशत्। य, नश्यति शत्रुस्तिरोभवति इत्यर्थः। ऊ, नशिष्यति नङ्क्ष्यति। इति दुर्गादासः॥

णस, ङ कृतौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सकं च-सेट्।) कृतिरिह कुटिलीभावस्तत्करणञ्च। ङ, नसते खलः कुटिलः स्यादित्यर्थः। नसते लतां वायुः कुटिलां करोतीत्यर्थः। इति दुर्गादासः॥

णह, य ञ औ बन्धे। इति कविकल्पद्रुमः॥ (दिवां-उभं-सकं-अनिट्।) य ञ, नह्यति नह्यते। औ, अनद्ध। इति दुर्गादासः॥

णाथ, ऋ ङ आशिषि। दवैश्वर्य्ये। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-अकं च-सेट्।) वोपदेशविधौ वर्ज्जनेऽप्यादास्य पाठः कस्यचिदनुरोधात्। ऋ, अननाथत्। ङ, प्रणाथते। दव उपतापः। आशीरिष्टार्थस्याशंसनम्। ङित्त्वेऽपि शपथाशीर्गत्यनुकारे इति नियमादाभ्यामाशिषोऽन्यत्र परस्मैपदम्। नाथति शत्रुं बली उपतापयति इत्यर्थः। नाथते श्रियं लोकः आशंसत इत्यर्थः। नाथति धनी ईश्वरः स्यादित्यर्थः। नाथति भूपं भूमिं विप्रः प्रार्थयतीत्यर्थः। मार्गणैरथ तव प्रयोजनं नाथसे किमु न भूभृतः पतिमिति भारवौ। याचनमप्याशंसाविशेषः। आशिषि नित्यमात्मनेपदमन्यत्र विभाषेति केचित्। इति दुर्गादासः॥

णाध, ऋ ङ नाथे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) वोपदेशविधावस्य वर्ज्जनेऽपि इह पाठः कस्यचिदनुरोधात्। ऋ, अननाधत्। ङ, नाधते नाथो दवाशीरैश्वर्य्यार्थिनानि। इति दुर्गादासः॥

णास, ऋ ङ ध्वाने। शब्द इति यावत्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ऋ, अननासत्। ङ, नासते। इति दुर्गादासः॥

णिक्ष, चुम्बने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) निक्षति। इति दुर्गादासः॥

णिज, इ ल ङ शुद्धौ। इति कविकल्पद्रुमः॥ (अदां-आत्मं-सकं सेट्-इदित्।) शुद्धिरिह शुद्धीकरणम् इ, कर्म्मणि निञ्ज्यते। ल ङ, प्रणिङ्क्ते। दक्षिणीयानां विप्राणां सम्यक् इति हलायुधः। इति दुर्गादासः॥

णिज, लि इर् ञ औ पोषे। शुद्धौ। इति कविकल्पद्रुमः॥ (ह्वां-उभं-सकं-अनिट्।) लि ञ, नेनेक्ति नेनिक्ते। इर्, अनिजत् अनैक्षीत्। औ, नेक्ता। इति दुर्गादासः॥

णिद, इ कुत्सने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-इदित्।) निंसनिन्दनिक्षां वोपदेवफलं चिन्त्यम्। णत्वविकल्पने स्वरूपग्रहणात्। केचित्तु क्षतिविकल्पमिच्छन्ति ण्वादौ तूपसर्गाद्समासे उपसर्गात् समासे ण्वादौ नित्यमित्यर्थः। यथा, प्रणिन्दकः प्रनिन्दकः। प्रणिन्दति। भट्टौ तु ण्वादावपि विकल्पो दृश्यते। इ, कर्म्मणि निन्द्यते। निन्दति दुष्टं लोकः। इति दुर्गादासः॥

णिद, ऋ ञ सन्निधौ। कुत्सने। इति कविकल्पद्रुमः॥ (भ्वां-उभं-अकं-कुत्सने-सकं-सेट्-ऋदित्।) सन्निधिः सन्निकर्षः। ऋ, अनिनेदत्। ञ, नेदति नेदते दयालुं दीनः। निनिदुः। इति दुर्गादासः॥

णिल, श गहने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) दन्त्यो। गहनं दुर्बोधः। श, निलति शास्त्रं कुधीः दुःखेन जानातीत्यर्थः। इति दुर्गादासः॥

णिव, इ सेके। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। इदित्।) दन्त्यो। इ, निन्वते। इति दुर्गादासः॥